1

॥ हितोपदेशे मित्रलाभप्रारम्भः ॥

श्रीगणेशाय नमः ॥ श्रीशारदायै नमः ॥ सिद्धिः साध्ये सतामस्तु प्रसादात्तस्य धूर्जटेः ॥ जाह्नवीफेनले
खेव यन्मूर्ध्नि शशिनः कला ॥१॥ श्रुतो हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु ॥ वाचां सर्वत्र वैचित्र्यं नीतिवि
द्यां ददाति च ॥२॥ अजरामरवत्प्राज्ञो विद्यामर्थं च चिन्तयेत् ॥ गृहीत इव केशेषु मृत्युना धर्ममाचरे
॥२॥ त् ॥३॥ सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ॥ अहार्यत्वादनर्घ्यत्वादक्षयत्वाच्च सर्वदा ॥४॥ विद्या ददाति
विनयं विनयाद्याति पात्रताम् ॥ पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखं ॥५॥ विद्या शस्त्रस्य शास्त्रस्य ॥
द्वे विद्ये प्रतिपत्तये ॥ आद्या हास्याय वृद्धत्वे द्वितीयाद्रियते सदा ॥६॥ संगमयति विद्यैव नीचगापि नरं वर
सरित् ॥ समुद्रमिव दुर्धर्षं नृपं भाग्यमतः परम् ॥७॥ यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत्
कथाच्छलेन बालानां नीतिस्तदिह कथ्यते ॥८॥ मित्रलाभः सुहृद्भेदो विग्रहः संधिरेव च ॥

हितोपदेशमित्रलाभः

रूपसमः ॥४॥ अपि च ॥ गुणिगणगणनारम्भे न पतति कठिन [illegible] कठिनी सुसंभ्रमाद्यस्य । तेनाम्बा य-
दि सुतिनी वद वंध्या कीदृशी भवति ॥५॥ दाने तपसि शौर्ये च यस्य न प्रस्फुरितं यशः । तस्य कृते भवत्य-
धनो यो धार्मिकः कुधीः ॥६॥ तथा सुतम् ॥ अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी
च ॥ वश्यश्च पुत्रोऽर्थकरी च विद्या षड्जीवलोकेषु सुखानि राजन् ॥७॥ नान्यथा मुदितानीतेन म
मृतवा गुणा वै नाः प्रियतामम् ॥ तथा चोक्तम् ॥ आयुः कर्म च वित्तं च विद्या निधनमेव च । पंचैतान्य- ॥२॥
पि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥८॥ किंच ॥ अवश्यंभाविनो भावा भवन्ति महतामपि । नग्नत्वं
नीलकंठस्य महाहिशयनं हरेः ॥९॥ यदभावि न तद्भावि भावि चेन्न तदन्यथा ॥ इति चिन्ताविषघ्नोऽयम-
घ्नोऽयमगदः किं न पीयते ॥१०॥ एतत्कार्याक्षमाणां केषांचिदालस्यवचनम् ॥ यथा हि

2

श्री
पंचतंत्रात्तथान्यस्मा ग्रंथादाकृष्य लिख्यते॥९॥ अस्ति भागीरथीतीरे पाटलिपुत्रनामधेयं नगरम्। तत्र
सर्वस्वामिगुणोपेतः सुदर्शनो नाम नरपतिरासीत्॥ स भूपतिरेकदा केनापि पठ्यमानं श्लोकद्वयं शुश्रा
व। अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्। सर्वस्य लोचनं शास्त्रं यस्य नास्त्यंध एव सः॥१०॥
यौवनं धनसंपत्तिः प्रभुत्वमविवेकता॥ एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्॥११॥ इत्याकर्ण्यात्मनः पु
त्राणां मूर्खत्वेनोद्विग्नमनाः स राजा चिंतयामास॥ कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः।
काणेन चक्षुषा किं वा चक्षुःपीडैव केवलम्॥१२॥ किं च। स जातो येन जातेन याति वंशः समुन्नतिम्। परि
वर्तिनि संसारे मृतः को वा न जायते॥१३॥ एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना। कुलं पुरुषसिंहेन
कौरप्रमाप्यते॥१४॥ दानेतपसि शौर्येच यस्य न प्रथितं यशः। विद्यायामर्थलाभे वा मातुरुच्चार

हितोपदेशे मित्रलाभः

अस्ति कश्चिदेवंभूतो यो नाम मम पुत्राणां नित्यमुन्मार्गगामिनां नीतिशास्त्रोपदेशेन पुनर्जन्म कारि
ष्यति यतः॥ काचः काञ्चनसंसर्गाद्धत्ते मारकतीं द्युतिम्॥ तथा सत्संनिधानेन मूर्खो याति प्र
वीणताम्॥ १॥ उक्तं च॥ हीयते हि मतिस्तात हीनैः सह समागमात्॥ समैश्च समतामेति विशिष्टैश्च
विशिष्टताम्॥ २॥ [illegible]न्ततो यदि पुत्राणां नीतिपरिज्ञानं मध्ये राजपुत्राध्यापने कः समर्थतां
॥३॥ नयति॥ अत्रान्तरे तेषां सामन्त[illegible] सकललोक्य विष्णुशर्मा नाम आलसो महापण्डितः सकल ॥३॥
नीतिशास्त्रतत्त्वज्ञो बृहस्पतिरिवाब्रवीत् देव महाकुलसंभवा एते राजपुत्रा नीतिं ग्राहयितुं
शक्यन्ते यतः नाद्रव्ये निहिता काचित् क्रिया फलवती भवेत्॥ न व्यापारशतेनापि शुकवत्
पाठ्यते बकः॥ अन्यच्च अस्मिंस्तु निर्गुणं गोत्रे

गु हृ श्र २

रथ चक्रेण न रथस्य गतिर्भवेत् ।। एवं पुरुषकारेण विना दैवं न सिध्यति ।।१।। पूर्वजन्मकृतं कर्म तद्दैव
मिति क थ्यते ।। तस्मात्पुरुषकारेण यत्नं कुर्यादतन्द्रितः ।।२।। उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन दे
यमिति कापुरुषा वदन्ति ।। दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ।।३।।
लो६ यथा मृत्पिण्डतः कर्ता कुरुते यद्यदिच्छति ।। एवमात्मकृतं कर्म मानवः प्रतिपद्यते ।।४।। अपरं च काक
तालीयवत्प्राप्तं दृष्ट्वापि निधिमग्रतः ।। न स्वयं दैव मादत्ते पुरुषार्थमपेक्षते ।।५।। तथा चोक्तम् ।। माता
शत्रुः पिता वैरी बालो येन न पाठितः ।। न शोभते सभामध्ये हंसमध्ये बको यथा ।।६।। उद्यमा
द्येनेन सर्वार्थी न चानुधमतः फलम् ।। नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।।७।। एवं सति
मातापिता समजापाठितस्तां कापि न यान् ।। मोमेपाठिता: अपूर्णा मक्का दूर्वेन म् न्मीक्ष: न

सुखासनोपविष्टेषु

सुखोपविष्टानां राजपुत्राणामग्रतः प्रस्तावक्रमेण पण्डितोऽब्रवीत्। सो मे राजेष्ठ श्रः स्तूपताम्। काव्यशा
स्त्रविनोदेन कालो गच्छति धीमताम्। व्यसनेन तु मूर्खाणां निद्रया कलहेन वा॥ २॥ तद्भवतां विनोदाय
काककूर्ममृगाखूनां विचित्रां कथां कथयामि॥ राजपुत्रैरुक्तं आर्य कथ्यताम्॥ विष्णुशर्मोवाच॥ शृणु
त॥ संप्रति मित्रलाभः प्रस्तूयते॥ यस्यायमाद्यः श्लोकः॥ असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः ॥४॥
१४॥ ॥ साधयन्त्याशु कार्याणि काककूर्ममृगाखुवत्॥ १॥ राजपुत्रा ऊचुः॥ कथमेतत्॥ विष्णुशर्मा कथयति
अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः। तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति। अथ कदा
चिदवसन्नायां रात्रावस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनकना
मा वायसः प्रबुद्धः सन् कृतान्तमिव द्वितीयमटन्तं व्याधमपश्यत्। तमालोक्याचिन्तयत्। अद्य प्रातरेवा
निष्टदर्शनं जातं॥ न जाने पुनः किमनभिमतं दर्शयिष्यति॥

हितोपदे ८

सि पल्पस्तुपजापते॥ श्राकोपकराणां जन्मकाव्यमरो ऽुतः॥२॥ अन्त अमासान्यन्तरेन पुत्रा
णां नीतिशास्त्राभिज्ञान महं करोमि अन्यथा न दास्यनाम परित्यागं करोमि॥ स्वयंहो स्थितः इति
लौ श्रुत्वा रागास विनयेन उवाच॥ काचः कांचन संसर्गाद्धत्ते मार्कतां द्युतिं॥ तथा सत्सन्निधाने
न मूर्खो याति प्रवीणतां॥१॥ कीटोपि सुमनः संगादारोहति सतां शिरः। अश्मापि या
ति देवत्वं महद्भिः सुप्रतिष्ठितम्॥२॥ अन्यश्च। यथोदयगिरेर्द्रव्यं सन्निकर्षेण दीप्यते।
तथा सत्सन्निधानेन [illegible] हीनवर्णोपि दीप्यते॥३॥ तदेतेषां मम पु
त्राणामुपदेशे भवन्त एव समर्थाः॥ इति श्रुत्वा तत्र विष्णुशर्मा सकलशास्त्रज्ञः सर्वतन्त्र
कप्रज्ञान समर्थितवान [illegible]

प्रयुक्तो व्याकुलः प्रचलितः। यतः। शोकस्थानसहस्राणि भयस्थानशतानि च। दिवसे दिवसे मूढमाविशन्ति न
पण्डितम्॥ ४॥ किं च। विपद्विरागे ... ङ्गजं फलं यथा॥ अस्यार्थो व्याख्येयः ... स्यते॥ सर्वा
व्याधिशोकानां किम् अनिष्टं ... त्यति॥ १ अस्यैतेन न्यायेन तत्कृत्वा नरकीर्तिं जालं विस्तारितम्।
तस्मिन्नेव काले चित्रग्रीवो नाम कपोतराजः सपरिवारो वियति विसर्पन्तण्डुलकणानवलोकयाम
स ततः तण्डुलकणलोलुपान् कपोतान् प्रति कपोतराजः आह कुतोऽत्र निर्जने वने
तण्डुलकणानां संभवः। तन्निरूप्यतां तावत्। भद्रमिदं न पश्यामि। प्रायेणानेन तण्डुलकणलोभेना
स्माभिरपि तथा भवितव्यम्॥ यथा। कंकणस्य तु लोभेन मग्नः पंके सुदुस्तरे। वृद्धव्याघ्रेण संप्राप्तः पथिकः
सन्मृतो यथा॥ २॥ कपोता ऊचुः॥ कथमेतत्। चित्रग्रीवः कथयति। अहमेकदा दक्षिणारण्ये
चरन्नपश्यम्॥ एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते॥

१

श्रीमित्रलाभः

ऽमोपान्यसंस्कृतसिंहकरां ऽत्यमांनतीक्षोभात्कल्पेन त्यानापि पान्येनाऽवोधितम्॥ अश्वेपनैतदपि संभ
वति॥ किं वक्ष्मिन यथसंदेह ... प्रशमितविधिः॥ यतः॥ अभिक्तारि छत्रगो न्या किं जीवतेषु भा
पयाप्ति विभसंभगौ। स्मृतं तदपि मत्स्यद्दे॥२॥ किंतु सर्वत्रार्थी जेनप्रवर्तितसंदेहस्य ज्ञातथा यो तं
१८ नेमशापमनाहयन्यौ मद्धारिपथप्पनि॥ संधापंत्रनारा३ुप्रसंधि यदि जीवति सद्भवति।१॥ तंन्ति
पयामि॥ नाव त्वप्रकाथांदू ते॥ कुत्र न वक्तव्यं धात्रोहस्तंप्रसाप्य दर्शयति पान्थो। वदत कथं तपिधि
भ्नाप्तः। व्याघ्रो। वदत हृदनीमप्पहं

6